# Shri Shukakritam Vishnu Stotram

# श्रीशुककृतं विष्णुस्तोत्रम्

## Document Information

Text title : Shri Shukakritam Vishnu Stotram

File name : shukakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, bRRihannAradIyapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 62/50-65||

Latest update : October 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 26, 2024

*sanskritdocuments.org*

# श्रीशुककृतं विष्णुस्तोत्रम्

शुक उवाच ।
नमस्ते वासुदेवाय सर्वलोकैकसाक्षिणे ॥ ५० ॥

जगद्बीजस्वरूपाय पूर्णाय निभृतात्मने ।
हरये वासुकिस्थाय श्वेतद्वीपनवासिने ॥ ५१ ॥

हंसाय मत्स्यरूपाय वाराहतनुधारिणे ।
नृसिंहाय ध्रुवेज्याय साङ्ख्ययोगेश्वराय च ॥ ५२ ॥

चतुःसनाय कूर्माय पृथवे स्वसुखात्मने ।
नाभेयाय जगद्धात्रे विधात्रेऽन्तकराय च ॥ ५३ ॥

भार्गवेन्द्राय रामाय राघवाय पराय च ।
कृष्णाय वेदकर्त्रे च बुद्धकल्किस्वरूपिणे ॥ ५४ ॥

चतुर्व्यूहाय वेद्याय ध्येयाय परमात्मने ।
नरनारायणाख्याय शिपिविष्टाय विष्णवे ॥ ५५ ॥

ऋतधाम्ने विधाम्ने च सुपर्णाय स्वरोचिषे ।
ऋभवे सुव्रताख्याय सुधाम्ने चाजिताय च ॥ ५६ ॥

विश्वरूपाय विश्वाय सृष्टिस्थित्यन्तकारिणे ।
यज्ञाय यज्ञभोक्त्रे च स्थविष्ठायाणवेऽर्थिने ॥ ५७ ॥

आदित्यसोमनेत्राय सहओजोबलाय च ।
ईज्याय साक्षिणेऽजाय बहुशीर्षाङ्घ्रिबाहवे ॥ ५८ ॥

श्रीशाय श्रीनिवासाय भक्तवश्याय शार्ङ्गिणे ।
अष्टप्रकृत्यधीशाय ब्रह्मणेऽनन्तशक्तये ॥ ५९ ॥

बृहदारण्यवेद्याय हृषीकेशाय वेधसे ।
पुण्डरीकनिभाक्षाय क्षेत्रज्ञाय विभासिने ॥ ६० ॥

गोविन्दाय जगत्कर्त्रे जगन्नाथाय योगिने ।
सत्याय सत्यसन्धाय वैकुण्ठायाच्युताय च ॥ ६१॥

अधोक्षजाय धर्माय वामनाय त्रिधातवे ।
घृतार्चिषे विष्णवे तेऽनन्ताय कपिलाय च ॥ ६२॥

विरिञ्चये त्रिककुदे ऋग्यजुःसामरूपिणे ।
एकशृङ्गाय च शुचिश्रवसे शास्त्रयोनये ॥ ६३॥

वृषाकपय ऋद्धाय प्रभवे विश्वकर्मणे ।
भूर्भुवःस्वःस्वरूपाय दैत्यघ्ने निर्गुणाय च ॥ ६४॥

निरञ्जनाय नित्याय ह्यव्ययायाक्षराय च ।
नमस्ते पाहि मामीश शरणागतवत्सल ॥ ६५॥

इति स्तुतः स भगवाञ्च्छङ्खचक्रगदाधरः ।
आरणेयमुवाचेदं भृशं प्रणतवत्सलः ॥ ६६॥

इति नारदपुराणे पर्वभागे द्विषष्टितमाध्यायान्तर्गतं
श्रीशुककृतं विष्णुस्तोत्रं समाप्तम् ।

बृहन्नारदीयपुराण । पूर्वभाग । अध्याय ६२/५०-६५॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 62/50-65..

Proofread by PSA Easwaran

*Shri Shukakritam Vishnu Stotram*

pdf was typeset on October 26, 2024

Please send corrections to *sanskrit@cheerful.com*